अथ

चतुर्विंशतिगायत्री

प्रारभ्यते।

चतुर्विंशतिगायत्र्याः विषयानुक्रमणिका ।

श्रीगणपतये नमः । अथ चतुर्विंशति गायत्र्यः लिख्यन्ते ॥ यज्ञो दानं जपो होमः स्वाध्यायः पितृकर्म च । वृथा भवन्ति विप्रेन्द्र ऊर्ध्वपुण्ड्रैर्विनाकृतम् ॥ ॐउत्तिष्ठन्तु महाभूतायेभूताभूमिपालकाः ॥ भूतानामविरोधेनब्रह्मकर्म्मसमाचरेत् ॥१॥

अथ गायत्र्यावाहनम् ।

ॐआगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ॥ गायत्रिच्छन्दसांमातर्ब्रह्मयोनेन

मोस्तुते ॥२॥ ॐ अस्यश्रीवसिष्ठशापमोच
नमंत्रस्य वसिष्ठऋषिरनुष्टुप्छन्दः । श्री
विष्णुर्देवता । वसिष्ठशापमोचनेजपेविनि
योगः ॥ अहोमहाब्रह्मरूपेदिव्यसिद्धेसर
स्वति ॥ अजरेअमरेकुर्यावसिष्ठाच्छाप
मोचनम् । ॐ गायत्र्याः विश्वामित्रऋषिः ॥
गायत्रीछन्दः । सवितादेवता जपोपनयने
विनियोगः ।

अथ ध्यानम् ।

कुमारीं त्वृग्वेदयुतां ब्रह्मरूपां विचिन्तयेत् ॥ हंसस्थितांकुशहस्तांसूर्यमंडलसंस्थिताम् ॥ १ ॥ मध्याह्नेविष्णुरूपाञ्च तार्द्यस्थांपीतवासिनीम् ॥ युवतींसयजुर्वेदां सूर्यमंडलसंस्थिताम् ॥ २ ॥ सायाह्नेशिवरूपाञ्चवृद्धांवृषभवाहिनीम् । सूर्य्यमंडलमध्यस्थांसामवेदसमायुताम् ॥ ३ ॥

अथ अंगन्यासः ।

ॐ वाक् २ । ॐ प्राणः २ ॐ चक्षुः २ । ॐ श्रोत्रं २ । ॐ उदरे २ । ॐ ललाटे २ । ॐ नाभौ २ । ॐ हृदि २ । ॐ कंठे २ । ॐ शिरसि २ । ॐ शिखायां २ । ॐ कवचं ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥ तत्स वितुर्वरेण्यं भर्गोदेवस्यधीमहि धियोयोनः प्रचोदयात् । ॐ भूः अंगुष्ठाभ्यांनमः । ॐ

भुवःतर्जनीभ्यांनमः । ॐ स्वःमध्यमाभ्यां नमः। ॐ भर्गोदेवस्यधीमहिकानिष्ठिकाभ्यां नमः । ॐ धियोयोनः प्रचोदयात् करतल करपृष्ठाभ्यांनमः॥ इतिकरन्यासः । ॐभूः हृदयायनमः। ॐ भुवःशिरसेस्वाहा ॥ ॐ स्वः शिखायैवषट् ॥ ॐ तत्सवितुर्वरेण्यं कवचाय हुं ॥ ॐ भर्गोदेवस्यधीमहिनेत्र त्रयायवौषट् ॥ ॐ धियोयोनःप्रचोदयात् अस्त्रायफट् ॥ ॐ तत्पादयोः ॥ सवितु

जंघयोः वरेण्यंकटिदेशे ॥ भर्गोनाभौ ॥ देवस्यहृदये। धीमहिकंठे। धियोनासाग्रे। योनेत्रयोः। नः ललाटे इत्यंगन्यासः।

अथ चतुर्विंशतिगायत्र्यस्तदादौ ब्रह्म गायत्रीमन्त्रः।

ॐ भूः। ॐ भुवः। ॐ स्वः। ॐ महः। ॐजनः ॐ तपः। ॐ सत्यम्। तत्सवितुर्वरेण्यंभर्गोदेवस्य धीमहि। धियोयोनः प्रचोदयात्। ॐ आपोज्योतीरसोऽमृतंब्रह्म

भूर्भुवः स्वः ॐ इतिब्रह्मगायत्रीमंत्रः ॥ १ ॥

अथ रामगायत्री ।

ॐ अस्य श्रीरामगायत्रीमंत्रस्यवामदेवऋषिः । गायत्रीछन्दः श्रीजानकीवल्लभो देवता । श्रीरामोतिबीजम् । दाशरथायेति शक्तिः गायत्र्यावाहनेजपेविनियोगः । ॐ दाशरथायविद्महे सीतावल्लभायधीमहि । तन्नोरामः प्रचोदयात् ॥ ॐ दाशरथायअंगुष्ठाभ्यां नमः । ॐ विद्महेतर्जनीभ्यांनमः ।

च. ४

ॐ सीतावल्लभायमध्यमाभ्यांनमः । ॐ धी महिह्वनामिकाभ्यांनमः । ॐ तन्नोरामः कनिष्ठिकाभ्यांनमः । इतिकरन्यासः । ॐ दाशरथायहृदयायनमः । ॐ विद्महेशिरसे स्वाहा । ॐ सीतावल्लभायशिखायैवषट् । ॐ धीमहिकवचाय हुं ॥ ॐ तन्नोरामःनेत्र त्रयायवौषट् । ॐ प्रचोदयादस्त्रायफट् । इतिहृदयादिन्यासः । ॐ हांह्रींरांरामायन मः ॥ ॐ जानकीतंतारकरांरामायनमः ।

गा. ४

इतिरामगायत्रीमन्त्रः ॥२॥

अथ सीतागायत्रीमंत्रः।

ॐजनकजायैविद्महे रामाप्रियायैधीमहि। तन्नःसीता प्रचोदयात्॥ ॐ जनकजायै अंगुष्ठाभ्यांनमः। ॐ विद्महेतर्जनीभ्यां नमः ॐरामाप्रियायैमध्यमाभ्यांनमः। ॐ धीमहि अनामिकाभ्यांनमः। ॐतन्नः सीताकनिष्ठिकाभ्यांनमः। ॐप्रचोदयात्करतलकरपृष्ठाभ्यांनमः। इतिकरन्यासः। ॐजनक

च. ५ गा. ५

जायैहृदयायनमः। ॐविद्महेशिरसेस्वाहा। ॐरामप्रियायैशिखायैवषट्। ॐधीमहिकवचाय हुं ॐतन्नः सीतानेत्रत्रयायवौषट्। ॐप्रचोदयादस्त्रायफट्। इति हृदयादिन्यासः। ॐसींसीतायैनमः इतिजानकीगायत्रीमंत्रः॥ ३॥

लक्ष्मणगायत्रीमंत्रः।

ॐदाशरथायविद्महे अलबेलायधीमहि। तन्नोलक्ष्मणः प्रचोदयात्॥ ॐदाशरथाय

अंगुष्ठाभ्यांनमः ॐ विद्महेतर्जनीभ्यांनमः। ॐअलबेलायमध्यमाभ्यांनमः । ॐधीमहि अनामिकाभ्यांनमः। ॐतन्नोलक्ष्मणःकनि ष्ठिकाभ्यांनमः । ॐ प्रचोदयात् करतल करपृष्ठाभ्यां नमः। इतिकरन्यासः। ॐ दाशरथायहृदयायनमः। ॐ विद्महेशिरसे स्वाहा । ॐअलबेलायशिखायैवषट् ॐ धीमहिकवचायहुं । ॐतन्नोलक्ष्मणः नेत्र त्रयाय वौषट् । ॐप्रचोदयादस्त्रायफट्।

च.   ६   गा.   ६

इतिअंगन्यासः । ॐ ह्रां ह्रीं राराल लंलक्ष्म
णायनमः। इतिलक्ष्मणगायत्रीमंत्रः ॥ ४ ॥

अथ कृष्णगायत्रीमंत्रः ।

ॐदेवकीनंदनायविद्महे । वासुदेवाय
धीमहि । तन्नः कृष्णः प्रचोदयात् । ॐदेव
कीनंदनायअंगुष्ठाभ्यांनमः । ॐविद्महेतर्ज
नीभ्यांनमः। ॐवासुदेवायमध्यमाभ्यांनमः।
ॐ धीमहिअनामिकाभ्यांनमः । ॐ तन्नः
कृष्णः कनिष्ठिकाभ्यांनमः। ॐ प्रचोदयात्

करतलकरपृष्ठाभ्यांनमः। इतिकरन्यासः।
ॐदेवकीनंदनाय हृदयायनमः। ॐ विद्महे
शिरसेस्वाहा। ॐ वासुदेवायशिखायैवषट्।
ॐधीमहिकवचायहुं। ॐ तन्नः कृष्णःनेत्र
त्रयायवौषट्। ॐ प्रचोदयादस्त्रायफट्।
इति अंगन्यासः। ॐ क्लींकृष्णायनमः।
इतिकृष्णगायत्रीमंत्रः ॥५॥

अथ गोपालगायत्रीमंत्रः।

ॐगोपालायविद्महे। गोपीजनवल्लभायधी

महि । तन्नोगोपालः प्रचोदयात् । ॐ गो
पालायअंगुष्ठाभ्यांनमः । ॐ विद्महेतर्जनी
भ्यांनमः । गोपीजनवल्लभायमध्यमाभ्यां
नमः । धीमहिअनामिकाभ्यांनमः । ॐ तन्नो
गोपालःकनिष्ठिकाभ्यांनमः । ॐ प्रचोदया
त्करतलकरपृष्ठाभ्यांनमः । इतिकरन्या
सः । ॐ गोपालायहृदयायनमः । ॐ विद्महे
शिरसेस्वाहा । ॐ गोपीजनवल्लभायशि
खायैवषट् । ॐ धीमहिकवचायहुं । अ

तन्नोगोपालः नेत्रत्रयायवौषट् । ॐ प्रचो
दयादस्त्रायफट् । इतिअंगन्यासः । ॐ
गोपालागोचरायवंशशब्दायनमोनमः । इति
गोपालगायत्रीमन्त्रः ॥६॥

अथ राधिकागायत्रीमंत्रः ।

ॐ वृषभानुजायैविद्महे । कृष्णप्रिया
यैधीमहि । तन्नोराधिकाप्रचोदयात् । ॐ
वृषभानुजायैअंगुष्ठाभ्यांनमः । ॐ विद्महे
तर्जनीभ्यांनमः । ॐ कृष्णप्रियायैमध्यमा

भ्यांनमः । ॐ धीमहित्र्यनामिकाभ्यांनमः । ॐतन्नोराधिकाकनिष्ठिकाभ्यांनमः । ॐप्रचोदयात्करतलकरपृष्ठाभ्यांनमः । इतिकरन्यासः । ॐ वृषभानुजायैहृदयायनमः । ॐ विद्महेशिरसेस्वाहा । ॐकृष्णप्रियायैशिखायैवषट् । ॐधीमहिकवचायहुं । ॐ तन्नोराधिकानेत्रत्रयायवौषट् । ॐ प्रचोदयादस्त्रायफट् । इतिअंगन्यासः । ॐरांराधिकायैनमः । इतिराधिकागायत्रीमंत्रः ॥७॥

अथ नारायणगायत्रीमन्त्रः ।

ॐनारायणायविद्महे । वासुदेवायधीमहि । तन्नो नारायणःप्रचोदयात् ॥ ॐनारायणाय अंगुष्ठाभ्यां नमः । ॐविद्महेतर्जनीभ्यांनमः । ॐवासुदेवायमध्यमाभ्यांनमः ॐधीमहिअनामिकाभ्यांनमः । ॐतन्नोनारायणः कनिष्ठिकाभ्यांनमः । ॐप्रचोदयात्करतलकरपृष्ठाभ्यांनमः॥ इति करन्यासः॥ ॐनारायणायहृदयायनमः । ॐविद्महेशिरसेस्वाहा । ॐवासुदेवायशिखायैवषट् ।

ॐधीमहिकवचायहुं । ॐतन्नोनारायणःने त्रत्रयायवौषट् । ॐप्रचोदयादस्त्रायफट् । इतिअंगन्यासः । ॐह्रींश्रींश्रीमन्नारायणाय नमः । इतिनारायणगायत्रीमंत्रः ॥ ८ ॥

॥ अथ लक्ष्मीगायत्रीमंत्रः ॥

ॐमहादेव्यै च विद्महे । विष्णुपत्न्यै च धीमहि । तन्नोलक्ष्मीःप्रचोदयात् । ॐमहादेव्यै च भूर्भुवः अंगुष्ठाभ्यांनमः । ॐविद्महे तर्जनीभ्यांनमः । ॐविष्णुपत्न्यै च मध्यमा

भ्यांनमः। ॐधीमहि अनामिकाभ्यांनमः ॐतन्नोलक्ष्मीः कनिष्ठिकाभ्यांनमः ॐप्रचोदयात्करतलकरपृष्ठाभ्यांनमः। इतिकरन्यासः। ॐमहादेव्यै च हृदयायनमः। ॐविद्महे शिरसेस्वाहा। ॐ विष्णुपत्न्यै च शिखायैवषट्। ॐ धीमहि कवचायहुं। ॐतन्नो लक्ष्मीर्नेत्रत्रयायवौषट् ॐ प्रचोदयादस्त्रायफट्। इत्यंगन्यासः॥ ॐ क्लीं श्रीं श्रीं लक्ष्मी देव्यैनमः॥ इतिलक्ष्मीगायत्रीमंत्रः॥ ६॥

॥ नृसिंहगायत्रीमंत्रः ॥

ॐ उग्रनृसिंहाय विद्महे। वज्रनखाय धीमहि तन्नो नृसिंहः प्रचोदयात् ॥ ॐ उग्र नृसिंहाय अंगुष्ठाभ्यां नमः। ॐ विद्महे तर्जनीभ्यां नमः॥ ॐ वज्रनखाय मध्यमाभ्यां नमः। ॐ धीमहि अनामिकाभ्यां नमः। ॐ तन्नो नृसिंहः कनिष्ठिकाभ्यां नमः। ॐ प्रचोदयात्करतलकरपृष्ठाभ्यांनमः। इति करन्यासः ॥ॐ उग्रनृसिंहायहृदयायनमः।

ॐ विद्महेशिरसेस्वाहा । ॐ वज्रनखायशि
खायैवषट् । ॐ धीमहिकवचायहुं । ॐ तन्नो
नृसिंहः नेत्रत्रयायवौषट् । ॐ प्रचोदयाद
स्त्रायफट् । इति अंगन्यासः । ॐ नृंनृंनृंनृ
सिंहायनमः । इति नृसिंहगायत्री मंत्रः ॥ १० ॥

॥ परशुरामगायत्रीमंत्रः ॥

ॐ जामदग्न्यायविद्महे । महावीरायधी
महि । तन्नः परशुरामः प्रचोदयात् । ॐ
जामदग्न्याय अंगुष्ठाभ्यां नमः । ॐ विद्म

हेतर्जनीभ्यां नमः। ॐ महावीरायमध्यमा भ्यां नमः। ॐ तन्नःपरशुरामः कनिष्ठिका भ्यां नमः। ॐ प्रचोदयात्करतलकरपृष्ठा भ्यां नमः। इति करन्यासः। ॐ जामदग्न्या य हृदयाय नमः। ॐ विद्महेशिरसे स्वाहा। ॐ महावीराय शिखायै वौषट्। ॐ धीमहि कवचायहुं। तन्नो परशुरामः नेत्रत्रयायवौ षट्। ॐ प्रचोदयादस्त्रायफट्। इति अंग न्यासः। ॐ रांरां ॐ रांरां ॐ परशुहस्ताय

नमः । इति परशुरामगायत्रीमंत्रः ॥११॥

विष्णुगायत्रीमंत्रः ।

ॐ श्रीविष्णवेचविद्महे । वासुदेवायधीमहि । तन्नोविष्णुः प्रचोदयात् ॥ ॐ श्रीविष्णवे च अंगुष्ठाभ्यांनमः । ॐ विद्महेतर्जनीभ्यां नमः । ॐ वासुदेवाय मध्यमाभ्यां नमः ॐ धीमहि अनामिकाभ्यां नमः । ॐ तन्नो विष्णुः कनिष्ठिकाभ्यां नमः । ॐ प्रचोदयात्करतलकरपृष्ठाभ्यां नमः । इतिकरन्या

च. सः । ॐ श्रीविष्णवे च हृदयाय नमः । ॐ गा.

१२ विद्महे शिरसे स्वाहा । ॐ वासुदेवायशिखा यैवषट् । ॐ धीमहिकवचायहुँ । तन्नो विष्णु नेत्रत्रयायवौषट् । ॐ प्रचोदयादस्त्राय फट् । इतिअंगन्यासः । इति विष्णुगायत्री मंत्रः ॥१२॥

हनुमानगायत्रीमंत्रः ।

ॐ अंजनीजाय विद्महे । वायुपुत्राय धीमहि । तन्नोहनुमान् प्रचोदयात् ॥ ॐ

अंजनीजाय अंगुष्ठाभ्यां नमः। ॐ विद्महे तर्जनीभ्यां नमः। ॐ वायुपुत्राय मध्यमाभ्यां नमः। ॐ धीमहि अनामिकाभ्यांनमः। ॐ तन्नो हनुमान्कनिष्ठिकाभ्यां नमः। ॐ प्रचोदयात्करतलकरपृष्ठाभ्यां नमः। इति करन्यासः। ॐ अंजनीजायहृदयाय नमः। ॐ विद्महेशिरसे स्वाहा। ॐ वायुपुत्राय शिखायै वौषट्। ॐ धीमहिकवचाय हुं। ॐ तन्नोहनुमान्नेत्रत्रयायवौषट्। ॐ

प्रचोदयादस्त्रायफट् । इति अंगन्यासः ।
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः । इति हृदुमद्गायत्री
मंत्रः ॥१३॥

गरुडगायत्रीमंत्रः ।

ॐ तत्पुरुषायविद्महे । सुवर्णपर्णाय
धीमहि । तन्नो गरुडः प्रचोदयात् । ॐ त
त्पुरुषाय अंगुष्ठाभ्यां नमः । ॐ विद्महे
तर्जनीभ्यां नमः ॐ सुवर्णपर्णायमध्यमाभ्यां
नमः । ॐ धीमहि अनामिकाभ्यां नमः ।

तन्नो गरुडः कनिष्ठिकाभ्यां नमः ॐ प्रचो
दयात्करतलकरपृष्ठाभ्यां नमः। इति कर
न्यासः। ॐ तत्पुरुषायहृदयायनमः। ॐ वि
द्महे शिरसे स्वाहा। ॐ सुवर्णपर्णाय शि
खायैवषट्। ॐ धीमहिकवचायहुं। ॐ तन्नो
गरुडः नेत्रत्रयायवौषट्। ॐ प्रचोदयाद
स्त्रायफट्। इति अंगन्यासः। ॐ ग्रां
ग्रीं ग्रूं ग्रैं ग्रौं ग्रः। इति गरुडगायत्री
मंत्रः॥१४॥

॥ तुलसीगायत्रीमंत्रः ॥

ॐ श्रीत्रिपुरायविद्महे। तुलसीपत्रा यधीमहि। तन्नस्तुलसी प्रचोदयात्। ॐ विद्महेतर्जनीभ्यां नमः। ॐ तुलसीपत्रा यमध्यमाभ्यांनमः॥ ॐ तन्नस्तुलसीकानि ष्ठिकाभ्यां नमः। ॐ प्रचोदयात्करतलक रपृष्ठाभ्यां नमः। इति करन्यासः। ॐ श्रीत्रिपुरायहृदयाय नमः। ॐ विद्महेशिर सेस्वाहा। ॐ तुलसीपत्राय शिखायवौ

षट् । ॐ धीमहि कवचाय हुं । ॐ तन्नस्तु लसी नेत्रत्रयायवौषट् । ॐ प्रचोदयादस्त्रा यफट् । इति अंगन्यासः ॥१५॥

॥ सूर्यगायत्रीमंत्रः ॥

ॐ भास्कराय विद्महे । महातेजाय धीमहि । तन्नः सूर्यः प्रचोदयात् ॥ ॐ भास्कराय अंगुष्ठाभ्यां नमः । ॐ विद्महेतर्जनीभ्यां नमः । ॐ महातेजायमध्यमाभ्यां नमः । ॐ धीमहि अनामिकाभ्यां नमः ।

ॐ तन्नः सूर्य्यः कनिष्ठिकाभ्यां नमः । ॐ प्रचोदयात्करतलकरपृष्ठाभ्यां नमः । इति करन्यासः । ॐ भास्करायहृदयाय नमः । ॐ विद्महेशिरसे स्वाहा । ॐ महातेजाय शिखायैवौषट् । ॐ धीमहि कवचायहुं । ॐ तन्नः सूर्य्यो नेत्रत्रयाय वौषट् । ॐ प्रचोद दयादस्त्रायफट् । इति अंगन्यासः । ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः । ॐ विष्णुतेजसे ज्वालामणिकुण्डलाय स्वाहा । इति

सूर्य्यगायत्रीमंत्रः ॥ १६ ॥

॥ गुरुगायत्रीमंत्रः ॥

ॐ गुरुदेवाय विद्महे । परब्रह्मायधीमहि । तन्नोगुरुः प्रचोदयात् ॥ ॐ गुरुदेवाय अंगुष्ठाभ्यां नमः । ॐ विद्महेतर्जनीभ्यां नमः । ॐ परब्रह्मायमध्यमाभ्यां नमः । ॐ धीमहि अनामिकाभ्यां नमः । ॐ तन्नोगुरुः कनिष्ठिकाभ्यां नमः ॐ प्रचोदयात्करतलकरपृष्ठाभ्यां नमः । इति करन्या

सः । ॐ गुरुदेवायहृदयाय नमः। ॐ विद्म हेशिरसे स्वाहा ॥ ॐ परब्रह्मायशिखायै वषट् । ॐ धीमहि कवचायहुं ॐ तन्नो गुरुः नेत्रत्रयाय वौषट् । ॐ प्रचोदयाद स्त्रायफट् । इति अंगन्यासः । ॐ हुं सं क्रांसौः गुरुदेवपरमात्मने नमः । इति गुरु गायत्री मंत्रः ॥१७॥

शिवगायत्रीमन्त्रः ।

ॐ महादेवायविद्महे । रुद्रमूर्तये धीम

हि । तन्नः शिवः प्रचोदयात् ॥ ॐ महादे
वाय अंगुष्ठाभ्यांनमः । ॐ विद्महेतर्जनी
भ्यांनमः । ॐ रुद्रमूर्तये मध्यमाभ्यांनमः ।
ॐ धीमहिअनामिकाभ्यां नमः । ॐ तन्नः
शिवः कनिष्ठिकाभ्यां नमः । ॐ प्रचोदया
त्करतलकरपृष्ठाभ्यांनमः। इति करन्यासः।
ॐ महादेवाय हृदयाय नमः । ॐ विद्महे
शिरसेस्वाहा । ॐ रुद्रमूर्तयेशिखायैवषट् ।
ॐ धीमहि कवचाय हुं । ॐ तन्नः

शिवः नेत्रत्रयायवौषट् । ॐ प्रचोदयाद स्त्रायफट् । इति अंगन्यासः । ॐ संसंसं ह्रींह्रींह्रीं ॐ शिवायनमः । इति शिवगा यत्रीमंत्रः ॥ १८ ॥

॥ अथ गौरीगायत्रीमंत्रः ॥

ॐ सुभगाय च विद्महे । काममाला यधीमहि । तन्नोगौरी प्रचोदयात् ॥ ॐ सुभ गाय अंगुष्ठाभ्यां नमः । ॐ विद्महे तर्जनी भ्यांनमः । ॐ काममालायमध्यमाभ्यांनमः ।

ॐ धीमहि अनामिकाभ्यांनमः॥ ॐ तन्नोगौ-
रीकनिष्ठिकाभ्यांनमः। ॐ प्रचोदयात्करत
लकरपृष्ठाभ्यांनमः। इति करन्यासः। ॐ
सुभगायहृदयायनमः। ॐ विद्महेशिरसे
स्वाहा। ॐ काममालायाशिखायैवषट्।
ॐ धीमहिकवचायहुं। ॐ तन्नोगौरी नेत्र
त्रयायवौषट्। ॐ प्रचोदयादस्त्रायफट्।
इति अंगन्यासः। ॐ क्लीं ॐ गौं गौरी
भ्योनमः। इति गौरीगायत्रीमंत्रः॥१६॥

॥ अथ देवीगायत्री मंत्रः ॥

ॐ देवीब्रह्माणीविद्महे । महाशक्त्यै च धीमहि । तन्नोदेवी प्रचोदयात् ॥ ॐ देवीब्रह्माण्यै अंगुष्ठाभ्यांनमः । ॐ विद्महे तर्जनीभ्यां नमः । ॐ महाशक्त्यैमध्यमाभ्यांनमः ।ॐ धीमहि अनामिकाभ्यांनमः। ॐ तन्नोदेवी कनिष्ठिकाभ्यांनमः। ॐ प्रचोदयात्करतलकरपृष्ठाभ्यां नमः । इति करन्यासः ॥ ॐ देवीब्रह्माण्यैहृदयायनमः।ॐ

विद्महेशिरसेस्वाहा । ॐ महाशक्त्यैचाशि खायै वषट् । ॐ धीमहिकवचायहुं । ॐ तन्नोदेवीनेत्रत्रयायवौषट् । ॐ प्रचोदयाद-स्त्रायफट् । इति अंगन्यासः ॐ ह्रां श्रीं सोहं क्लीं नमः । इति देवीगायत्री मंत्रः ॥ २० ॥

॥ पृथ्वीगायत्रीमंत्रः ॥

ॐ पृथ्वीदेव्यैचविद्महे । सहस्त्रमूर्त्यैच धीमहि । तन्नोमहीप्रचोदयात् ॥ ॐ पृथ्वी

देव्यैचअंगुष्ठाभ्यांनमः। ॐविद्महे तर्जनीभ्यां नमः। ॐ सहस्रमूर्त्यैचमध्यमाभ्यां नमः। ॐ तन्नोमहीकनिष्ठिकाभ्यांनमः। ॐ प्रचोदयात्करतलकरपृष्ठाभ्यां नमः। इति करन्यासः। ॐ पृथ्वीदेव्यैचहृदयायनमः। ॐ विद्महेशिरसेस्वाहा। ॐ सहस्रमूर्त्यैचशिखायैवषट्। ॐ धीमहिकवचायहुं। ॐ तन्नोमहीनेत्रत्रयायवौषट्। ॐ प्रचोदयादस्त्रायफट्। इति अंगन्यासः। ॐ भूर

सिभूतादिरसिविश्वस्यधायाभुवनस्यमहिषी नमः । इतिपृथ्वीगायत्रीमंत्रः ॥ २१ ॥

॥ अग्निगायत्रीमंत्रः ॥

ॐ महाज्वालायविद्महे। अग्निमध्न्याय धीमहि। तन्नोअग्निः प्रचोदयात् । ॐ महाज्वालायँ अंगुष्ठाभ्यां नमः। ॐ विद्महे तर्जनीभ्यांनमः । ॐ अग्निमध्न्यायमध्यमाभ्यांनमः।ॐ धीमहिअनामिकाभ्यांनमः। ॐ धीमहिअनामिकाभ्यांनमः । ॐ तन्नो

अग्निः कनिष्ठिकाभ्यां नमः। ॐ प्रचोदया
त्करतलकरपृष्ठाभ्यांनमः। इतिकरन्यासः।
ॐ महाज्वालायहृदयायनमः। ॐ विद्महे
शिरसेस्वाहा। ॐ अग्निमद्यायशिखायै
वषट्। ॐ धीमाहिकवचायहुं। ॐ तन्नोऽग्निः
नेत्रत्रयायवौषट्। ॐ प्रचोदयादस्त्राय
फट्। इति अंगन्यासः। ॐ अंअंअग्नये
नमः। इति अग्निगायत्रीमंत्रः॥ २२॥

जलगायत्रीमंत्रः ।

ॐ जलबिंबायविद्महे । नीलपूर्षायधीमहि । तन्नस्त्वंबुप्रचोदयात् । ॐ जलबिंबाय अंगुष्ठाभ्यांनमः । ॐ विद्महेतर्जनीभ्यां नमः । ॐ नीलपूर्षायमध्यमाभ्यां नमः । ॐ धीमहिअनामिकाभ्यांनमः । ॐ तन्नस्त्वंबुकनिष्ठिकाभ्यांनमः । ॐ प्रचोदयात्करतलकरपृष्ठाभ्यांनमः । इति करन्यासः । ॐ जलबिंबायहृदयायनमः । ॐ विद्महेशि

रससस्वाहा । ॐ नीलपूर्षाय शिखायैवषट् । ॐ धीमाहिकवचायहुं । ॐ तन्नस्त्वंबुनेत्रत्र यायवौषट् । ॐ प्रचोदयादस्त्रायफट् । इति अंगन्यासः । ॐ जंजं ॐ बंबं ॐ लंलं ॐ जलबिंबायनमः ॥ इति जलगायत्री मंत्रः ॥ २३ ॥

गगनगायत्रीमंत्रः ।

ॐ आकाशाय चविद्महे । नभोदेवाय धीमहि । तन्नो गगनं प्रचोदयात् । ॐ आका

शाय च अंगुष्ठाभ्यांनमः। ॐ विद्‌महेतर्ज
नीभ्यांनमः। ॐ नभोदेवायमध्यमाभ्यांनमः।
ॐ धीमहिअनामिकाभ्यां नमः। ॐ तन्नोग
गनं कनिष्ठिकाभ्यांनमः। ॐ प्रचोदयात्कर
तलकरपृष्ठाभ्यांनमः। इति करन्यासः।
ॐ आकाशहृदयायनमः। ॐ विद्‌महे शिर
सेस्वाहा। ॐ नभोदेवायशिखायै वषट्।
ॐ धीमहिकवचायहुं। ॐ तन्नोगगनं नेत्र
त्रयायवौषट्। ॐ प्रचोदयादस्त्रायफट्।

इति अंगन्यासः। ॐ गंगं नंनं ॐ आंआं ॐ गगनायनमः। इति गगनगायत्रीमंत्रः॥२४॥

चन्द्रगायत्री मंत्रः।

ॐ क्षीरपुत्रायविद्महे। अमृततत्त्वायधीमहि। तन्नश्चन्द्रः प्रचोदयात् ॥ ॐ क्षीरपुत्राय अंगुष्ठाभ्यां नमः। ॐ विद्महेतर्जनीभ्यांनमः। ॐ अमृततत्त्वायमध्यमाभ्यांनमः। ॐ धीमहिअनामिकाभ्यां नमः। ॐ प्रचोदयात्करतलकरपृष्ठाभ्यां

नमः । इति करन्यासः ॥ ॐ वीरपुत्राय हृदयायनमः । ॐ विद्महेशिरसेस्वाहा । ॐ अमृततत्त्वायशिखायैवषट् । ॐ धीमहिकवचायहुं । ॐ तन्नश्चन्द्रः नेत्रत्रयाय वौषट् । ॐ प्रचोदयादस्त्रायफट् । इति अंग न्यासः । इति चंद्रगायत्रीमंत्रः ॥ २५ ॥

पवनगायत्रीमंत्रः ।

ॐ पवनपूर्षायविद्महे । सहस्रमूर्त्तं च धीमहि । तन्नो वायुः प्रचोदयात् । ॐ

पवनपूर्षायअंगुष्ठाभ्यां नमः । ॐ विद्महे
तर्जनीभ्यां नमः । ॐ सहस्त्रमूर्तें च मध्यमा
भ्यांनमः । ॐ धीमहिअनामिकाभ्यां नमः ।
ॐ प्रचोदयात्करतलकरपृष्ठाभ्यांनमः। इति
करन्यासः ॥ ॐ पवनपूर्षायहृदयायनमः ।
ॐ विद्महेशिरसेस्वाहा । ॐ सहस्त्रमूर्तेंच
शिखायैवषट् । ॐ धीमहिकवचायहुं । ॐ
तन्नोवायुः नेत्रत्रयायवौषट् । ॐ प्रचोदयाद
स्त्राय फट् । इति अंगन्यासः ॥ ॐ पंपं ॐ

वांवां ॐ युंयुं ॐ पवनपूर्षाय नमः ॥ इति पवनगायत्रीमंत्रः॥ २६ ॥

हंसगायत्रीमंत्रः ।

ॐ परमहंसायविद्महे । महातत्त्वाय धीमहि तन्नो हंसः प्रचोदयात् । ॐ परम हंसाय अंगुष्ठाभ्यां नमः । ॐ विद्महे तर्जनीभ्यां नमः । ॐ महातत्त्वायमध्यमाभ्यां नमः । ॐ धीमहिअनामिकाभ्यां नमः । ॐ तन्नोहंसः कनिष्ठिकाभ्यांनमः । ॐ प्रचो

दयात्करतलकरपृष्ठाभ्यां नमः। इतिकरन्यासः। ॐ परमहंसायहृदयायनमः। ॐ विद्महेसिरसेस्वाहा। ॐ महातत्त्वायशिखायैवषट् ॐ धीमहिकवचायहुम्। ॐ तन्नो हंसः नेत्रत्रयायवौषट्। ॐ प्रचोदयादस्त्रायफट्। इति अंगन्यासः। ॐ सोहंसोहंपरोरजसेसावदोम्। इति हंसगायत्रीमंत्रः२ ७

॥ इति गायत्र्यः संपूर्णाः ॥

अथ यज्ञोपवीतमंत्राः ।

ॐ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तुतेजः ॥ १ ॥ ॐ यज्ञोपवीत मन्त्रस्य गौतमभरद्वाजात्रेयऋषयः, ऋग्यजुः सामानि छन्दांसि, ब्रह्मविष्णुमहेश्वरा देवताः, नित्यनैमित्तिककर्माणि यज्ञोपवीतधारणे जपे विनियोगः । ॐ यज्ञोपवीतम् अंगुष्ठाभ्यां नमः । परमं पवित्रं तर्जं

नीभ्यां नमः। प्रजापतेर्यत्सहजं पुरस्तात् म
ध्यमाभ्यां नमः। आयुष्यमग्र्यं प्रतिमुञ्च शु
भ्रम् अनामिकाभ्यां नमः। यज्ञोपवीतं कनि
ष्ठिकाभ्यां नमः। बलमस्तुतेजः करतलक
रपृष्ठाभ्यां नमः। इति करन्यासः॥ ॐ य
ज्ञोपवीतं हृदयाय नमः। परमं पवित्रं शिर-
से स्वाहा। प्रजापतेर्यत्सहजं पुरस्तात् शि
खायै वषट्। आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं
कवचाय हुम्। यज्ञोपवीतं नेत्रत्रयाय वौषट्

बलमस्तु तेजः अस्त्राय फट् । इत्यंगन्या
सः ॥ अथ ध्यानम् ॥ तं सत्यं च परं ब्रह्म
पुरुषं कृष्णपिंगलम् । ऊर्ध्वरूपं विरूपा
क्षं नारायणमुपास्महे ॥ १ ॥ स्कन्दपुरा
णे-नारद उवाच ॥ भगवञ्छ्रोतुमिच्छामि नव
सूत्रस्य लक्षणम् । कस्मिन् वसति को दे
वः तन्मे ब्रूहि पितामह ॥२॥ ब्रह्मोवाच ॥ ॐ
कारःप्रथमे सूत्रे द्वितीये चाग्निदेवता ॥ तृ
तीये तक्षकश्चैव चतुर्थे चन्द्र एव च

॥ ३ ॥ पञ्चमे पितृदेवस्तु षष्ठे चैव प्रजा
पतिः ॥ सप्तमे वासुदेवः स्यात् अष्टमे रवि
रेव च ॥ नवमे सर्वदेवास्तु नवसूत्रस्य लक्ष
णाम् ॥४॥ श्रीनारद उवाच ॥ केन चोत्पा
दितं सूत्रं केनेदं त्रिगुणीकृतम् ॥ ग्रन्थि
बन्धः कृतः केन केनेदं ह्यभिमंत्रितम् ॥५॥
ब्रह्मोवाच ॥ मया चोत्पादितं सूत्रं विष्णुना
त्रिगुणीकृतम् ॥ ग्रन्थिबन्धः त्रिनेत्रेण गाय
त्र्या चाभिमन्त्रितम् ॥ ६ ॥ यः पठेत् प्रात

रुत्थाय स्नानकालेऽपि यः पठेत् । कर्माधि
कारी स भवेत् ब्रह्मचर्यफलं लभेत् ॥७॥
निष्फलं वहते भारं यो न जानाति लक्ष
णाम् । कर्मबाह्यो भवेद्विप्रः परलोकेऽपि ग
र्हितः ॥८॥ हारीतः॥ एकैकमुपवीतं तु यती
नां ब्रह्मचारिणाम् ॥ गृहीणां च वनस्था
नामुपवीतद्वयं स्मृतम् ॥ १ ॥ सोत्तरीयं
तृतीयं वा बिभृयाच्छुभ्रतन्तुना ॥ आश्र
माणां चतुर्णां तु यज्ञसूत्रं विधीयते॥२॥

च. गा. २६

भृगुस्मृतौ-यज्ञसूत्रं वटोरेकं द्वे तथेतरयोः स्मृते। एकमेव यतीनां स्यादिति धर्मो व्यवस्थितः ॥ १ ॥ पञ्चैव पुत्रकामस्तु धर्मकामस्तथैव च। आयुष्कामः सदा कुर्याद्बहु यज्ञोपवीतकम् ॥ २ ॥ सूतके मृतके क्षौरे चाण्डालस्पर्शने तथा। यज्ञसूत्रं नवीनं तु धारयेन्मनुरब्रवीत् ॥ ३ ॥ श्वानरासभसंस्पर्शे म्लेच्छानां स्पर्शने तथा॥ सूतके ग्रहणे चैव श्मशाने सूर्यसंक्रमे ॥४॥

यज्ञसूत्रं नवीनं तु धारयेयुर्मनीषिणः ॥ ५ ॥

अथ जीर्णोपवीतविसर्जनमंत्रः ॥

ॐ यज्ञोपवीतं यदि जीर्णवन्तं वेदान्त
वेद्यं परब्रह्मसूत्रम् । आयुष्यमग्र्यं प्रतिमु
ञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥६॥
पतितं त्रुटितं वापि ब्रह्मसूत्रं यदा भवेत् ।
नूतनं धारयेद्विप्रः स्नानसंकल्पपूर्वकम् ॥७॥
विरक्ता भगवद्भक्ताः त्यक्तवर्णाश्रमा मुने ।
मालाकारं यज्ञसूत्रं धारयेयुर्मनीषिणः ॥८॥

निष्कामो निर्मम: शान्तो वैष्णवो भगव-
त्प्रिय:॥ यज्ञसूत्रं मुनिश्रेष्ठ मालाकारं च
धारयेत् ॥६॥

॥ अथ मुद्राविधिप्रारम्भः ॥

सुमुखं संपुटं चैव विततं विस्तृतं तथा॥
मुखकं द्विमुखं चैव चतुःपञ्चमुखं तथा ॥
षण्मुखाऽधोमुखं चैव व्यापिकाञ्जलिकं
तथा ॥ शकटं यमपाशं च ग्रथितं चोन्मु
खोन्मुखम् । प्रलम्बं मुष्टिकं चैव मत्स्यकू-

ंवराहकम् । सिंहाक्रान्तं महाक्रान्तं मुद्गरं
पल्लवं तथा ॥ एता मुद्रा न जानाति गा
यत्री निष्फला भवेत् ॥ १ ॥

आवाहन्याद्येकादश मुद्राः प्रदर्श्यन्ते ॥
आवाहनी स्थानपरा सन्निहेती तथैव च। सन्नि
रुद्धा संमुखा चावगुंठना प्रकीर्तिता ॥ पद्मा
शार्ंगधराचैव कौस्तुभा वनमालिका ॥ योनि
मुद्रा नमस्कारा एवमेकादश स्मृताः ॥ २ ॥

पुनरष्टौ मुद्राः प्रदर्श्यन्ते ॥ सुरभीज्ञा-

नवैराग्यो योनिः कूर्मोऽथ पङ्कजम् ॥ लिंगं निर्वाणमुद्राश्च अष्टौ मुद्राः प्रकीर्तिताः ॥ १ ॥ इति मुद्राविधिः ॥ उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ॥ ब्राह्मणेभ्यो-भ्यनुज्ञाता गच्छ देवि यथासुखम् ॥ २॥

॥ इति विसर्जनम् ॥

पुस्तक मिलने का पता—

बाबू प्रह्लाददास बुकसेलर,

कचौड़ीगली, बनारस सिटी।

बी. के. शास्त्री द्वारा—ज्यौतिषप्रकाश प्रेस, विशेसरगंज, बनारस सिटी में मुद्रित।